॥ અવતારત્રયસ્તોત્રમ ॥

પાલયસ્વ નિપાલયસ્વ નિપાલયસ્વ રમાપતે ।
વાદિરાજમુનીંદ્રવંદિત વાજિવક્ત્ર નમોઽસ્તુ તે ॥ ૫ ॥

મધ્વહૃત્કમલસ્થિતં વરદાયકં કરુણાકરં
લક્ષ્મણાગ્રજમક્ષયં દુરિતક્ષયં કમલેક્ષણમ ।
રાવણાંતકમવ્યયં વરજાનકીરમણં વિભું
અંજનાસુતપાણિકંજનિષેવિતં પ્રણમામ્યહમ ॥ ૧ ॥

દેવકીતનયં નિજાર્જુનસારથિં ગરુડધ્વજં
પૂતનાશકટાસુરાદિખલાંતકં પુરુષોત્તમમ ।
દુષ્ટકંસનિમર્દનં વરરુગ્મિણીપતિમચ્યુતં
ભીમસેનકરાંબુજેન સુસેવિતં પ્રણમામ્યહમ ॥ ૨ ॥

જ્ઞાનમુક્તિસુભક્તિદં વરબાદરાયણમવ્યયં
કોટિભાસ્કરભાસમાનકિરીટકુંડલમંડિતમ ।
વાક્સુદર્શનતઃ કલેઃ શિરઘાતકં રમયા યુતં
મધ્વસત્કરકંજપૂજિતમક્ષયં પ્રણમામ્યહમ ॥ ૩ ॥

॥ ઈતિ શ્રીવાદિરાજપૂજ્યચરણવિરચિતં અવતારત્રયસ્તોત્રમ ॥